# पाणिनीय-भाषा-विज्ञानम्

**सुनीलकुमाशर्मा**
वरिष्ठानुसन्धाता
भारतीयज्ञानपरम्परा

सर्वव्यवहारसाधिका मानवं मानवनिर्मात्री मूकजगते शब्दप्रदायिनीयं वाक् यदि नाभविष्यत्तर्हि जगतः कल्पना शिल्पकारस्य मूर्तिमात्रं स्यात् । उच्यते खलु –

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ काव्यादर्शः १.४**

लोकाय सर्वादौ वाक्प्रदायिका विश्वस्य सम्पन्नतमस्य आदिमग्रन्थस्य भाषा दैवीवाक् संस्कृतम् एव, यतः विश्वस्य प्रथमाक्रिया प्रारब्धा । तथा हि –

**अनादिनिधना नित्या वागुत्सृष्टा स्वम्भुवा ।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥ महाभा. शा.पर्व अ .२२४/५५**
**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ वाक्यपदीयम् १.१**

ज्ञानराशिः शब्दब्रह्मात्मकः वेदः स्वषडङ्गैः परिपूर्णो वर्तते । षडङ्गानि च शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, ज्योतिषम्, छन्दः इति । उक्तं हि –

**शिक्षा कल्पं व्याकरणं निरुक्तं ज्योतिषं तथा ।**
**छन्दो विचितिरित्येते षडङ्गं वेद उच्यते ॥**

अथात्र षट्स्वङ्गेषु प्रधानं व्याकरणं मुख्यस्थानं भजते । अत्रापि पाणिनीयव्याकरणस्यैव महत्वं सर्वतोऽधिकं वर्तते । तथा हि –

**पाणिनीयं महाशास्त्रं पदसाधुत्वबोधकम् ।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥**

एवं वेदपरिपोषकस्य संरक्षकस्य च पाणिनीयव्याकरणस्य संस्कृतभाषायाः जगति अत्यधिकं स्थानं वर्तते । पाणिनीयव्याकरणेनैव वर्तमाने संस्कृतस्य आदर्शस्वरूपं सुस्थापितम् ।

भाषाणां विशिष्टं ज्ञानं यत्र क्रियते तत् भाषाविज्ञानमित्युच्यते । भाषाविज्ञानस्य ज्ञानात् पूर्वं भाषा नाम का? इति प्रश्नः उदेत्येव । भाष् (अभिव्यक्तिकरणे) इत्यस्माद्धातोः “अ” प्रत्ययेन टापि च “भाषा” इति शब्दः

निष्पद्यते। अत्र अप्रत्यार्थश्च कर्म। अर्थात् भाष्यते प्राणिभिः असौ भाषा कथ्यते। अथवा करणार्थे प्रत्यये भाष्यन्ते स्वविचाराः अभिव्यक्तीक्रियन्ते अनया इति भाषा।

एवम् अद्यावधिपर्यन्तं भाषाविद्भिः नैकेषां प्राणीनां भावानाम् अवगमनाय तेषां भाषायाः यदध्ययनं विहितं तत्र भाषा व्यवहारसाधिका साधनरूपा च वर्तते। एवं प्राणिनां मुखध्वनिः, इंगितिः,संकेताः,चिन्हानि च व्यवहारस्य अभिव्यक्तीकरणस्य साधनानि वर्तन्ते । अतः प्राणिनां (पशूनां,पक्षिणां ,मानवानां कीटादीनाञ्च) कश्चिद्विशिष्टः क्रमबद्धश्च ध्वनिः, तेषां संकेताः , चिह्नानि वा भाषारूपेण व्यवह्रियन्ते। यथोच्यते भगवता कपिलेन –

**स्फुटवाक्करणोपात्तो, भावाभिव्यक्तिसाधकः।**
**सङ्केतितोध्वनिव्रातः, सा भाषेत्युच्यते बुधैः॥**

**भाषायाः प्रकृतिः-**

**१- भाषा एका पद्धतिः अस्ति -**

बी. ब्लोच तथा जी. एल ट्रेगर महोदयानुसारम्- भाषा यादृच्छिक-वाचिकध्वनिसंकेतानां सा पद्धतिः वर्त्तते , यया मानवः स्वविचाराणाम् आदानं प्रदानं वा करोति।

**२- भाषा संकेतानां समूहः -**

प्रत्येकस्यां भाषायां उच्चार्यमाणानां ध्वनीनां वस्तुक्रिया कर्मादिभिः सह सम्बन्धः भवति। ते च ध्वनयः प्रतीकात्मकाः भवन्ति। यथा अस्ति इति क्रियायाः प्रकटनाय आग्लेन "इज" इति ध्वनिः क्रियते। अतः वस्तुतः एतेषां ध्वनीनां प्रतीकानां संकेतानां वा प्रयोगः क्रियते। अत उच्यते कैश्चित् भाषा तेषां संकेतानां समुदाय इति।

**३- भाषा वाचिकध्वनिसंकेतः –**

ये केचन संकेताः भाषा नैव कथ्यन्ते अपितु मानवोच्चारिताः व्याकरणनियमवद्धाः वाचिकध्वनीनां संकेताः एव भाषा उच्यते इति स्वीकुर्वन्ति केचित् । अत्र रक्तहरितादिविद्युत्कन्दानां, ट्रैफिकचिह्नानां वा भाषायां परिगणनं नैव शक्यते। एवमेव शंखनाद-भेरिनादादिविभिन्नध्वनीनां चाऽपि परिगणनं न भवति। अपितु ताः ध्वनयः याः मानवोच्चारिताः सन्ति ताः एव भाषात्वेन व्यवह्रियन्ते।

एतेषां ध्वनीनां अध्ययनाय एव ध्वनिविज्ञानं प्रवर्तते। अस्यानुसारं या खलु लेखनपद्धतिः लिपिः वा लोके भाषाइति कथ्यते किन्तु एतत् तु ध्वनीनां केवलं संकेतमात्रम्। अर्थात् वाचिकध्वनिः एव भाषा भवितुमर्हति। एतेन सिद्धान्तेन संस्कृतव्याकरणस्य स्फोट्सिद्धान्तः समर्थ्यते।

**४- यादृच्छिकध्वनीनां समुदायः भाषा –**

भाषा वस्तुतः नास्ति नियमवद्धं क्रमवद्धं वा व्यवस्थितं किञ्चित् अपितु एतत् ध्वनीनां कश्चन यादृच्छिकसमुदायः वर्तते। इति स्वीकुर्वन्ति केचित्। यथा कस्यचित् समाजस्य बालकः गोः कृते "काऊ" इति वदति, कश्चन "गाय" इति वदति, कश्चन "गौः" इति। एतेषां ध्वनीनाम् अर्थस्तु एकएव। अतः नैकविधसमाजे स्थितः जनः तदर्थान् यादृच्छिकध्वनिभिः व्यवहरति। अतः अत्र व्याकरणसम्बन्धिनियमानां महत्त्वं न्यूनं वर्तते।

**भाषायाः प्रकाराः –**

वस्तुतस्तु भाषा प्राणिमात्रस्य हृदिस्था काचित् शक्तिविशिष्टा एकैव किन्तु लोकव्यवहारेण प्राणिभेदेन च भाषायाः वैभिन्यं दृश्यते। कस्यचित् स्थानस्य प्राणिनां शरीरसंरचना भिन्ना भवति। इति कृत्वा भाषाय़ाः भेदाः भवन्ति।

प्रामुख्येन अधोलिखिताधारेण भाषायाः चत्वारः विभागाः भवितुमर्हति।

1. **इतिहासदृष्ट्या –**

अत्र कालानुसारं भाषा विभज्यते। यथा सर्वप्रथमम् आदिमा भाषा, अनन्तरं चान्या। अत्र संस्कृतम् इतिहासदृष्ट्या आद्या भाषा भवति अनन्तरं पालि-प्राकृत-हिन्दीत्यादीनां वर्गीकरणं भवति।

2. **भौगोलिकदृष्ट्या –**

अत्र वयं स्थानविशेषेण तत्रस्थां भाषां परिचिनुमः यथा – पंजाबस्था पंजाबी, राजस्थानस्था राजस्थानी, बिहारस्था बिहारी एतादृश्यः भाषाः व्यवह्रियन्ते।

3. **प्रयोगाधारेण –**

प्रयोक्तुः अधारेण वयं कस्याश्चित् भाषाया भेदं कुर्मः। यथा – साहित्यिकभाषा, राजभाषा, राष्ट्रभाषा, शुद्धभाषा, अशुद्धभाषा इत्यादयः भेदाः प्रयोगाधारेणैव सन्ति।

4. **निर्मातुः आधारेण –**

अत्र कदाचित् तस्याः भाषायाः परिगणनं भवति यस्याः भाषायाः निर्माणं मानवेन प्रयोगविशेषाय क्रियते। एषा भाषा प्रायः कृत्रिमा भवति। अत्र कूटभाषा, कृत्रिमभाषा, यान्त्रिकभाषा इत्यादयः भाषाः समायान्ति। एतेषां विभाजनस्य आधारभेदेन भाषायाः अनेकरूपाणि भवितुमर्हन्ति यत्-

१. **मूलभाषा**

२. **स्तरीयभाषा अथवा परिष्कृतभाषा**
३. **विभाषा अथवा उपभाषा**
४. **अपभाषा**
५. **विशिष्टभाषा**
६. **कूटभाषा**
७. **कृत्रिमभाषा**

एवं मानवस्य हृदये विराजमाना काचित् एकैव शक्तिः वाक् विभिन्नरूपेषु व्यवह्रीयते। तदेवोच्यते खलु ऋग्वेदे –

> **चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।**
> **गुहा त्रीणिनिहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति इति।** ऋग्वेद – **१.१६४.४५**

**पाणिनिः भाषावैज्ञानिकः –**

भाषाविज्ञानस्य ध्वनिविचारः इति सिद्धान्तानुसारं , ध्वनिभेद-ध्वनिपरिवर्तननियमानुसारं, तथा विभिन्नानाम् उत्पत्तिसिद्धान्तानाम् अनुसारं पाणिनिः अपि एतानि तत्वानि प्रत्यपादयत्।

अस्य भाषावैज्ञानिकतत्वानि तु अधः प्रस्तूयन्ते –

**१. ध्वनिविज्ञानं पाणिनिश्च –**

भाषा ध्वनिरूपैव खलु! अत एव भाष्यकारेण ध्वनिरपि भाषात्वेन स्वीकृता। तथा हि पश्पशाह्निके शब्दलक्षणं –

**"अथवा लोके ध्वनिरेव शब्द इत्युच्यते" इति।**

एषः च ध्वनिः भाषणसमये कथं निर्गच्छति इत्यस्य वर्णनं पाणिनीयशिक्षायां वैज्ञानिकरीत्या कृतं वर्तते। पाणिनीयशिक्षा ग्रन्थस्तु भाषाविज्ञानस्य प्रथमः ग्रन्थः वक्तुं शक्यते। यत्र ध्वनीनां वर्गीकरणं कृतं वर्तते। वर्णानां भेदाः स्वराः व्यञ्जनानि च। स्वराणां उच्चारणस्थानम् अपि वैज्ञानिकरीत्या प्रस्तुतम् । अत्र पाणिनिना वर्णानामुच्चारणस्य सप्तप्रायः उच्चारणस्थानानि स्वीकृतानि यथा-

अवर्णस्य कवर्गस्य हकारस्य विसर्गस्य च उच्चारणस्थानं कण्ठः भवति। एवं कण्ठ-तालु-मूर्धा-दन्त-नासिका-ओष्ठ-जिह्वामूलानि एतानि वर्णानामुच्चारणस्थानानि भवन्ति । एतेषु एव स्थानेषु

स्वराः व्यञ्जनानि च उच्चार्यन्ते न तु अन्यस्मात् स्थानात् । एतेन तत्तत्स्थानविकृतौ तद्वर्णोच्चारणदोषः जनेषु दृश्यते एव । इदं वर्णनम् अतीव वैज्ञानिकं वर्तते ।

पाणिनेः वर्णानामुच्चारणे प्रयत्नकल्पना अपि वैज्ञानिकी । प्रयत्नो नाम व्यापारः अर्थात् वर्णानामुच्चारणे एकेन जनेन के के व्यापाराः क्रियन्ते इति । एतस्य कृते एतेन प्रयत्नाः भागद्वये स्वीकृताः तत्र आद्यः आभ्यन्तरप्रयत्नः द्वितीयश्च बाह्यप्रयत्न इति । अत्रापि आभ्यन्तरप्रयत्नस्य पञ्चभेदाः स्वीकृताः – स्पृष्ट-ईषत्स्पृष्ट-विवृत-ईषद्विवृत-संवृताः इति ।

एवमेव बाह्यप्रयत्नानाम् एकादशभेदाः परिगणिता आचार्येण । ते च विवार-श्वास-घोष-संवार-नाद-अघोष-अल्पप्राण-महाप्राण-उदात्त-अनुदात्त-स्वरिताः सन्ति । एवं कस्यचित् वर्णस्य उच्चारणे एकः प्रयत्नः अथवा एकाधिकप्रयत्नाः वा भवितुमर्हन्ति इति वर्णितम् आचार्येण ।

**पाणिनेः दृष्टौ भाषायाः आवश्यकतत्वानि –**

एकस्यां भाषायां अनेकानि लघुतत्वानि भवन्ति येषां संयोगेन भाषायाः निर्माणं भवति । अत्र सर्वतः प्रथमं भाषायाः मुख्यः विन्दुः आचार्येण "वाक्यम्" स्वीकृतं वर्तते । एतदनन्तरं वाक्येषु पदानि, पदेषु वर्णाः भवन्ति । एवं भाषायाः क्रमशः त्रीणि तत्वानि पाणिनिना स्वीकृतानि –

**१. वाक्यम्**
**२. पदम्/शब्दः**
**३. वर्णः/अक्षरम्**

एतस्य समर्थनं व्याकरणस्य अपराचार्यैरपि कृतं वर्तते । यथा वाक्यपदीयकारः–

**पदे न वर्णाः विद्यन्ते, वर्णेष्ववयवा न च ।**
**वाक्याद् पदानामानत्यं, प्रविवेको न कश्चन॥ वाक्यपदीयम् १.७४**

अर्थात् भाषायां वाक्य-पद-वर्णाः भवन्ति किन्तु अत्रापि वाक्यस्यैव प्राधान्यं भवति । लोके वाक्यादेव बोधदर्शनात् पाणिन्याद्याचार्याः वाक्यस्य प्राधान्यं स्वीकुर्वन्ति । किन्तु इतरेषां सप्तस्फोटानामपि अस्तित्वं स्वीकुर्वन्ति । अत् एव खलु स्फोटस्य भेदस्वीकारावसरे अष्टौ स्फोटाः इत्युच्यते । एवमाचार्यः पाणिनिः स्वनये भाषायाः आवश्यकतत्त्वेषु एतानि त्रीणि तत्वानि प्रामुख्येन स्वीकरोति ।

**पाणिनेः भाषोत्पतिसम्बन्धिमतम् –**

भाषायाः उत्पतिविषये पाणिनिः दिव्योत्पत्तिसिद्धान्तं तथा प्रतिभासिद्धान्तं च स्वीकरोति । यथा ऋग्वेदे दिव्यवाचः विषये वर्णनं प्राप्यते –

**देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । (ऋग्वेदः - ८.१००.११.)**

अर्थात् वाग्देवी भाषा दिव्यरूपेण प्रादुरभूत् । अस्यैव खलु विवरणं चतुर्दशमाहेश्वरसूत्रेषु प्राप्यते । एतेषां चतुर्दशसूत्राणां व्याख्यानं च पाणिनीयं व्याकरणं वर्तते । चतुर्दशसूत्राणां च प्रादुर्भावः महेश्वरात् भगवतः शिवात् अभूत् इति तु प्रसिद्धमेव वर्तते । तथा हि नांदिकेश्वरीये ग्रन्थे –

**नृत्तावसाने नटराजराजो ननादढक्कां नवपञ्चवारम् ।**
**उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥**

एवं चतुर्दशसूत्राणां व्याख्यानभूतं व्याकरणशास्त्रं भाषायाः दिव्योत्पत्तिसिद्धान्तं समर्थयति । अत्रैव भाषायाः उत्पत्तिविषये आचार्यः पाणिनिः विवक्षां कारणं स्वीकृत्य स्वप्रतिभां कारणत्वेन उपस्थापयति । पाणिनीयशिक्षायां भाषायाः उत्पत्तिः कथं भवति, कथं च भाषा भाष्यते इत्यस्यविषये वैज्ञानिकवर्णनं प्राप्यते । तथा हि आचार्यः पाणिनिः सर्वप्रथमं प्राणिनः विवक्षां कारणं मनुते । अनन्तरं विवक्षाधीनः मानवस्य आत्मा मनसा सह युज्यते । अनन्तरं च मनः कायाग्निं प्रेरयति । स च गुदामूलस्थो वायुः नादेन उत्पद्यते । मूले उत्पन्नो वायुः क्रमशः नाभिप्रदेशं, हृदयप्रदेशं, कण्ठं चेति भिन्नभिन्नस्थानेषु भूत्वा पुनः मुखस्य विभिन्नस्थानेषु संयुक्तः भवति । एतेन स्थानविशेषेण सह वायोः संयोगेन अस्माभिः प्राणिनः ध्वनिः श्रूयते । एषः च श्रूयमाणः ध्वनिः कण्ठात् पूर्वमपि तिष्ठति एव । तत्र सा भाषा वाक् वा परा पश्यन्ती मध्यमा इति त्रिभिः नामभिः व्यवह्रियते । इति एतत्सर्वं वर्णनं पाणिनीयशिक्षायां प्राप्यते । यच्च अद्यावधिपर्यन्तमपि सर्वश्रेष्ठवर्णनं वर्तते । तथा हि –

**आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्तो विवक्षया ।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । वाक्यपदीयम् १.११९**

**पाणिनिदृष्ट्या भाषायाः परिवर्तनम् –**

आचार्यः पाणिनिः शब्दानामुच्चारणस्योपरि अधिकं महत्त्वं ददाति । अत एव खलु! पाठकानां गुणदोषविवेचनसन्दर्भे वर्णोच्चारणस्य महत्त्वं प्रतिपादयति –

**एवं वर्णाः प्रयोक्तव्याः नाव्यक्ताः न च पीडताः ।**
**सम्यग् वर्णप्रयोगेन ब्रह्मलोके महीयते ।। पाणिनीय शिक्षा**

पाणिनिः आचार्यः भाषायाः परिवर्तनभिया एव ऋग्वेदस्य शिक्षां प्रणीतवान्। एवम् आचार्यः पाणिनिः एकः महान् शिक्षाविद् भाषाविच्च आसीत्। पाणिनेः महत्वम् अस्य प्रशस्तिभिरपि ज्ञातुं शक्यते –

**१. भाष्यकारः पतञ्जलिः** –

महाभाष्यस्य प्रथमाह्निकस्य प्रथमसूत्रे भाष्यकारः वदति यत् "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशो प्राङ्मुख उपविश्य महता प्रयत्नेनेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भावितुं किं पुनरियता सूत्रेण ?" (१.१.१.)

**२. काशिकाकारः जयादित्यः** –

**"उदक् च विपाशः"** सूत्रस्य व्याख्यायां जयादित्यः वदति – **"महति सूक्ष्मेक्षिका वर्तते सूत्रकारस्य"** इति।

**३. ह्वेनसांगमहोदयः** –

चीनदेशस्य यात्री ह्वेनसांगः अपि पाणिनिः महत्वं वर्णयति। तस्य अनुवादकः वाटर्सनामकः कश्चन लिखति यत् – "ऋषिणा पूर्णमनोयोगेन शब्दागारात् केवलं १००० दोहाछन्दस्स शब्दानां व्युत्पत्तिः कृता" प्रत्येकमपि छन्दः ३२ अक्षरात्मकम् आसीत्। अत्र च प्राचीनं नवीनं च लिखितं ज्ञानं समाप्तम्। शब्दविषयकं किमपि तथ्यं नावशिष्टम्। (ह्वेनसांग, वाटर्स अनुवादः भागः - १)

**४. प्रो० मोनियर विलियम्समहोदयः** –

आधुनिकविद्वत्सु पाश्चात्या अपि पाणिनेः महत्वं स्वीकुर्वन्ति। अत्र एषः वदति यत् – "संस्कृतव्याकरणं मानवमष्तिकस्य प्रतिभायाः तादृशं प्रतिमानं वर्तते यत् केनापि देशेन अद्यपर्यन्तं न प्रस्तुतम्"

**५. जर्मनदेशजः मैक्समूलरः** –

हिन्दूनां व्याकरणस्य अन्वययोग्यता संसारस्य कस्याश्चिदपि जातेः व्याकरणसाहित्यात् श्रेष्ठा वर्तते। (महान भारत इति पुस्तकस्य पृष्ठसंख्या १४९-१५०)

**६. डब्ल्यू ड्ब्ल्यू हण्टरमहोदयः** –

"संसारस्य व्याकरणेषु पाणिनेः व्याकरणं शिखरस्थम् । अस्य वर्णशुद्धता, भाषायाः धातुजन्यत्वम्, प्रकृतिप्रत्ययकल्पना च अद्वितीया वर्तते । अयं मानवमष्तिकस्य अत्यन्तं महत्वपूर्णः आविष्कारः वर्तते " (महान भारत इति पुस्तकस्य पृष्ठसंख्या १४९-१५०)

**७. प्रो० टी० शेखात्सकी** –

"मानवमष्तिकस्य सर्वश्रेष्ठरचनासु पाणिनिव्याकरणम् एका वर्तते।"

(हिन्दुस्तान की कहानी पृ० १३१)

एवं किमधिकं बहुना किन्तु वारं वारं इदमेव वक्तुं शक्यते यत् भाषाविज्ञानस्य भाषासु सर्वतो दृष्ट्या सम्पन्ना भाषा संस्कृतम्, अस्य सम्पन्नतायाः सर्वं श्रेयः पाणिनये एव गच्छति । अयमेव आचार्यः त्रिमुनिः व्याकरणस्य बीजमारोप्य संस्कृतं सुस्थापितवान् अन्यथा एषाऽपि कदाचित् जर्मनफ्रांसादीनां भाषाः इव नष्टा स्यात् । परन्तु आचार्यस्य व्याकरणं तदीया पाणिनीयपरम्परा च यावत् तिष्ठति तावत् संस्कृतमेव दिक्षु कीर्तिं प्रसारयिष्यति इति आशास्य विरमामि ।